संस्कृतम्

# अभ्यासपुस्तकम्

दशमी कक्ष्या

സംസ്കൃതം

# അഭ്യാസപുസ്തകം

ക്ലാസ് 10

സംസ്കൃതവിഭാഗം

**പൊതുവിദ്യാഭ്യാസവകുപ്പ്**

കേരള സർക്കാർ

2017

एककम् १ जीवनम्

# आयुरारोग्यसौखयम् १

## I. श्लोकानां गद्यक्रमं पूरयतु।

१. परिश्रमः ................ भूगतौ ............. । तौ अनादृत्य .......................... अहं ......................... ।

२. सुखस्य ............. शरीरम् एव। .................. चापि ................... शरीरम् ................ शरीरेण यद्यत् ..................... करोति .................. तत् समुपाश्नुते।

३. इर्ष्याभयक्रोधसमन्वितेन ..................... रुग्दैन्यनिपीडितेन ............... च ................... अन्नं ................... परिपाकमेति।

४. सुखदुःखयोः कर्तारम् .......................... मन्येत। तस्मात् ...................... प्रतिपद्येत न ...................... ।

५. धन्यानां ........................ उत्तमम्। ........................ श्रुतम् उत्तमम्। लाभानां श्रेष्ठम् ......................... । सुखानां ................... उत्तमा।

## II. सूचनानुसारं पठितानां श्लोकानाम् आस्वादनटीकां लिखतु।

1. ऐतरेयब्राह्मणाद् उद्धृतः श्लोकः। व्यायामस्य आवश्यकता। भूगतौ अश्विनीसुतौ। व्यायामः आहारमितत्वम्। वैद्यस्य आवश्यकता। अतीव हृद्यः श्लोकः। लोकोपकारकः महानाशयः। काव्यात्मकतया प्रतिपादितः।

2. सुभाषितावलिर्नाम ग्रन्थात् उद्धृतः श्लोकः। शरीरम् एव अस्माकं सुखस्य दुःखस्य च आश्रयः। शरीरेण यत् कर्म क्रियते तस्य कर्मणः फलं स्वशरिरेण एव उपभुङ्क्ते।

3. चरकसंहिता नाम ग्रन्थात् उद्धृतः। असूयालुभिः, भूतियुक्तैः, अमर्षयुक्तैः, लोलुपैः रोगग्रस्तैः, दीनैः, वैरचिन्तायुक्तैः च सेव्यमानम् अन्नं सम्यक् पक्वं न भवति। भोजनावसरे स्वस्थः भवेद् इति आशयः।

4. चरकसंहिता नाम ग्रन्थात् उद्धृतः श्लोकः। जीविते सुखस्य दुःखस्य च हेतुः स्वस्य कर्म। महत्तरं मार्गं प्राप्नुयात्। भयस्य आवश्यकता न। सन्मार्गेण सञ्चरेत्।

5. महाभारतात् उद्धृतः श्लोकः। कृतकृत्येषु सामर्थ्यं, धनेषु कीर्तिसम्पादनं, लाभेषु स्वास्थ्यं, सुखेषु तृप्तिः च श्रेष्ठाः। सुभाषितानि मानवानां धार्मिकमूल्यानि संवर्धयितुम् उपकारकाणि भवन्ति। शारीरिक-मानसिकविकासाय आरोग्यसंरक्षणाय च तानि प्रयोजनप्रदानि भवन्ति।

**III. सम्भाषणांशान् उपयुज्य आरोग्यविषयमधिकृत्य टिप्पणीं लिखत -**

बालः - नमस्ते।

वैद्यः - नमस्ते। आगच्छ...। केन हेतुना अस्वस्थ इव लक्ष्यते?

बालः - शरीरस्य स्वास्थ्यं नास्ति ।

वैद्यः - सुखदुःखयोः आयतनं शरीरमेव। स्वस्य कर्मणः फलं स्वयमेव अनुभूयते।

बालः - परिपाकं सम्यक् नास्ति। किं करणीयम्?

वैद्यः - भोजनावसरे इर्ष्यादिभावनां विहाय स्वस्थः भवेत्। अनेन भुक्तानां पचनं सम्यक् भवेत्।

बालः - तुष्टिः कथम् आप्नुयात्?

वैद्यः - कृतकृत्येषु सामर्थ्यं, धनेषु कीर्तिसम्पादनं, लाभेषु स्वास्थ्यं, सुखेषु तृप्तिः च आप्तव्यम्।

बालः - अन्यस्य वैद्यस्य आवश्यकता अस्ति वा ?

वैद्यः - परिश्रमः मिताहारः च भूगतौ अश्विनीसुतौ भवतः।
जनाः एतत् द्वयम् अनुशीलयन्ति चेत् अन्यस्य वैद्यस्य आवश्यकता नास्ति।

बालाः - धन्यवादः।

**IV. सुभाषितानि आधारीकृत्य प्रश्नानाम् उत्तरलेखनम्।**

1. भूगतौ अश्विनीसुतौ कौ?

.......................................................................................................

2. परिश्रमो मिताहारो .......... इति सुभाषितं कस्मात् उद्धृतम्?

.......................................................................................................

3. सुखदुःखयोः आयतनं किम्?

.......................................................................................................

4. देही किं समुपाश्नुते?

.......................................................................................................

5. कीदृशम् अन्नं न परिपाकमेति?

.......................................................................................................

6. सुखदुःखयोः कर्ता कः?

.......................................................................................................

7. धन्यानाम् उत्तमं किम्?

.......................................................................................................

8. धनानाम् उत्तमं किम्?

.......................................................................................................

9. लाभानाम् उत्तमं किम्?

.......................................................................................................

10. केषां तुष्टिः उत्तमा?

.......................................................................................................

**V. सन्धिं/विश्लेषणं/पदच्छेदं कुरुत।**

1. नैव = न + एव
   तेनैव = .......................... + ......................
   अत्रैव = .......................... + ....................

2. एवाहम् = एव + अहम्
   तत्राहम् = ........................... + .........................
   तेनापि = ........................... + ........................

3. तावनादृत्य = तौ + अनादृत्य
   भूगतावश्विनीसुतौ = .................. + .......................
   बालावागतौ = .................. + ......................
   शरीरमेव = शरीरम् + एव
   तमेव = .................. + ......................
   वृक्षमेव = .................. + ......................

**VI. उदाहरणानुसारं समस्तपदं/एकपदं लिखत -**

देहः अस्य अस्ति इति - देही
गुणः अस्य अस्ति इति - ..................................
शूलम् अस्य अस्ति इति - ..................................
बलम् अस्य अस्ति इति - ..................................

**VII. उदाहरणानुसारं विग्रहवाक्यं लिखत -**

सुखदुःखे - सुखं च दुःखं च
फलमूले - .......................................
धनधान्ये - .......................................

**VIII. प्रदत्तानि सुभाषितानि पठित्वा विषयानुसारं पट्टिकां करोतु -**

1. कामधेनुसमा विद्या
   सदैव फलदायिनी।
   प्रवासे मातृवत्तस्मात्
   विद्यागुप्तं धनं स्मृतम्।।

2. महाजनस्य संसर्गः
कस्य नोन्नतिकारकः।
पद्मपत्रस्थितं वारि
धत्ते मुक्ताफलश्रियम्।।

3. रूपयौवनसम्पन्नाः
विशालकुलसंभवाः ।
विद्याहीनाः न शोभन्ते
निर्गन्धा इव किंशुकाः।।

4. अयं निजः परो वेति
गणना लघुचेतसाम् ।
उदारचरितानां तु
वसुधैव कुटुम्बकम् ।।

5. विदेशेषु धनं विद्या
व्यसनेषु धनं मतिः।
परलोके धनं धर्मः
शीलं सर्वत्र वै धनम्।।

6. छायामन्यस्य कुर्वन्ति
तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय
वृक्षाः सत्पुरुषा इव।।

7. गुणवत् वस्तु संसर्गात्
याति स्वल्पोऽपि गौरवम्।
पुष्पमालानुषङ्गेण
सूत्रं शिरसि धार्यते ।।

8. परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम्।।

9. धर्मो जयति नाधर्मः
सत्यं जयति नानृतम्।
क्षमा जयति न क्रोधो
देवो जयति नासुरः।।

10. यथा चित्तं तथा वाचो
यथा वाचस्तथा क्रियाः।
चित्ते वाचि क्रियायां च
महतामेकरूपता ।।

---

**1. विद्या**

1) ..........................................................................

..........................................................................

..........................................................................

..........................................................................

2) ..................................................................

..................................................................

..................................................................

..................................................................

**2) परोपकारः**

1) ..................................................................

..................................................................

..................................................................

..................................................................

2) ..................................................................

..................................................................

..................................................................

..................................................................

**3. सज्जनमैत्री**

1) ..................................................................

..................................................................

..................................................................

..................................................................

2) ..................................................................

..................................................................

..................................................................

..................................................................

**4. धर्मः**

1) ..................................................................

..................................................................

..................................................................

..................................................................

2) ..................................................................

..................................................................

..................................................................

..................................................................

**5. शीलम्**

1) ..................................................................

..................................................................

..................................................................

..................................................................

2) ..................................................................

..................................................................

..................................................................

..................................................................

एककम् १ जीवनम्

# दीनवत्सला जननी

२

**I. पाठभागं संगृह्य लेखनम्, मातृभाषायां विवर्तनम् -**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत्। तयोः एकः दुर्बलः वेगेन गन्तुम् अशक्तः च। कृषकः तं वृषभं तोदनेन बहुवारं ताडितवान्। हलम् ऊढ्वा गन्तुम् अशक्तः वृषभः क्षेत्रे पतितवान्। तद्दृष्ट्वा सर्वधेनूनां जननी सुरभिः दुःखिता अभवत्। इमाम् अवस्थां दृष्ट्वा सुराधिपः धेनुम् अपृच्छत् - किं रोदिषि ? उच्यताम् इति। सा प्रत्यवदत् - मम पुत्रस्य दैन्यं पश्यति किम् ? भद्रे! नूनं बहवः पुत्राः सन्ति कुतः अस्मिन्नेव अधिकम् वात्सल्यम् ? इति इन्द्रेण पृष्टा सुरभिः प्रत्यवदत् - सर्वपुत्रेषु जननी तुल्यवत्सला किन्तु दुर्बले सुते मातुः अत्यधिका कृपा सहजैव इति। सुरभेः वचनं श्रुत्वा इन्द्रः तस्यै साहाय्यं कर्तुमिव वर्षेण जलोपप्लवं कृतवान्।

***कथामिमां मातृभाषायां विवर्तयतु -***

## II. सूचनानुसारं कथां लिखतु

खाण्डववने जरिता नाम पक्षी पुत्राः च अवसन्। एकदा दावाग्निः —— सर्वे भीताः —— पक्षीशाबकाः डयितुम् अशक्ताः —— साहाय्यार्थं कोऽपि नास्ति——माता पुत्रान् गृहीत्वा डयितुम् अशक्ता —— वृक्षस्य अधः मूषिकस्य कोटरं —— तत्र स्थापयति चेत् —— मूषकस्य आहारं —— ततोऽपि वरं अग्नौ मरणम् —— अशरणाः ते अग्निदेवं प्रार्थितवन्तः —— तदा वृष्टिः —— पक्षिणः सन्तुष्टाः।

## III. शतृ शानच् रूपाणि -

**1. शत्रन्तम् - धातुः परस्मैपदी - कर्त्तरि वर्तमानकालप्रयोगः**

धातुः + अत्

उदा - रक्ष् + अत् = रक्षत्

(त्रिषु लिङ्गेष्वपि प्रयुज्यते)

| | | | |
|---|---|---|---|
| पुल्लिङ्गः - | रक्षन् | - रक्षन्तौ | - रक्षन्तः |
| | क्रीडन् | - क्रीडन्तौ | - क्रीडन्तः |
| | तिष्ठन् | - तिष्ठन्तौ | - तिष्ठन्तः |
| | चोरयन् | - चोरयन्तौ | - चोरयन्तः |
| स्त्रीलिङ्गः | रक्षन्ती | - रक्षन्त्यौ | - रक्षन्त्यः |
| नपुं | रक्षत् | - रक्षती | - रक्षन्ति |

**2. शानजन्तम् - धातुः आत्मनेपदी - कर्त्तरिवर्तमानकालप्रयोगः**

धातुः + आन (मान)

उदा - कम्पमानः

(त्रिषु लिङ्गेष्वपि प्रयुज्यते)

| | |
|---|---|
| पुल्लिङ्गः - | वन्दमानः - वन्दमानौ - वन्दमानाः। |
| | याचमानः - याचमानौ - याचमानाः। |
| | लभमानः - लभमानौ - लभमानाः। |
| | शोभमानः - शोभमानौ - शोभमानाः। |
| स्त्री | वन्दमाना - वन्दमाने - वन्दमानाः। |
| नपुं | वन्दमानम् - वन्दमाने - वन्दमानानि। |

**3. कोष्ठकात् शतृशानजन्तरूपाणि विविच्य पट्टिकां करोतु -**

गच्छन्, क्रीडन्, वन्दमानः, पठन्, रुदन्, पचमानः, पचन्, ताडयन्, जल्पन्, प्रेरयन्, नुद्यमानः, गम्यमानः, वन्दमानः, कम्पमानः, तिष्ठन्, याचमानः, रक्षन्

| शत्रन्तम् | शानजन्तम् |
|---|---|
| | |

**IV. माञ्जूषातः समानार्थकपदानि चित्वा लिखत -**

| तनयः, माता, कृषीवलः, सुतः, जनयित्री, वृषः, कर्षकः, सूनुः, वलीवर्दः |
|---|

1. जननी - .................., ......................।
2. पुत्रः - .................., ......................।
3. कृषकः - .................., ......................।
4. ऋषभः - .................., ......................।

**V. लकारपरिचायनम् -**

| *लट्* | *लङ्* | *लोट्* |
|---|---|---|
| अस्ति | आसीत् | अस्तु |
| भवति | अभवत् | भवतु |
| पठति | ——— | पठतु |
| गच्छति | अगच्छत् | ——— |
| ——— | अक्रीडत् | ——— |
| ——— | अपतत् | ——— |
| ——— | ——— | क्रीडतु |

**VI. संबोधनरूपाणि -**

| *प्रथमा* | *संबोधनप्रथमा* |
|---|---|
| बालः | हे बाल! |
| रामः | हे राम! |
| पुत्रः | ——— |
| वत्सः | ——— |
| वासवः | ——— |
| लता | हे लते! |
| रमा | हे रमे! |
| भद्रा | ——— |
| वत्सा | ——— |
| राधा | ——— |

**VII. उदाहरणानुसारं यद्यपि - तथापि उपयुज्य वाक्यानि परिवर्तयतु -**

*उदा* - शरीरेण दुर्बलः। मनसा शक्तः भवति।

यद्यपि शरीरेण दुर्बलः तथापि मनसा शक्तः भवति।

1. पुस्तकम् अतिमनोहरम् । मूल्यं तु तुच्छम्।
2. वर्षाकालः समागतः। अतिवृष्टिः नास्ति।
3. रामः शीघ्रम् अधावत्। प्रथमस्थानं न लब्धवान्।
4. राजुः यथासमयं बस्निस्थानं गतः। वस्यानं न लब्धवान्।
5. रोगी औषधं अपिबत्। रोगशमनं नाभवत्।

**VIII. सन्धिं/विश्लेषणं/पदच्छेदं कुरुत -**

1. तस्मिन्नेव = तस्मिन् + एव

कुर्वन्नासीत् = ------------ + -------------

वदन्नासीत् = ------------ + -------------

2. सहजा + एव = सहजैव

------------ + ------------- = तथैव

------------ + ------------- = वृथैव।

एककम् १ जीवनम्

# मधुमान् नो वनस्पतिः ३

**I सन्धिच्छेदं कुरुत -**

उक्तिरियम् - उक्तिः + इयम्।

1. शिशुरपि - .................... + ..................

2. कविरिति - .................... + ..................

प्रसिद्धोऽस्ति = - प्रसिद्धः + अस्ति

1. सम्पन्नोऽस्मि - .................... + ..................

2. धन्योऽस्मि - .................... + ..................

ओषधिश्च - ओषधिः + च

ओषध्यश्च - .................... + ..................

प्रभेदाश्च - .................... + ..................

**II विग्रहवाक्यानि लिखत -**

1. आरोग्यपरिपालनाय - आरोग्यस्य परिपालनं, तस्मै आरोग्यपरिपालनाय।

2. सस्यसंरक्षणाय - ......................................................................................

3. सस्यविज्ञानाय - ......................................................................................

**III प्रदत्तेषु सस्यसम्बन्धीनि सुभाषितानि सञ्चित्य लिखतु -**

1. अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशतिन्त्रिणीः च।
कपित्थबिल्वामलकत्रयञ्च पञ्चाम्रनाली नरकं न याति।।

2. नराणामिव वृक्षाणां वातपित्तकफाद्गदाः।
सम्भवन्ति निरुप्यातः कुर्यात्तद्दोषनाशनम्।।

3. अजातशाखान् शिशिरे जातशाखान् हिमागमे।
वर्षागमे च सुस्कन्धान् यथा दिक्स्थान् प्ररोपयेत्।।

4. वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।
तथा पवनसंयुक्तः पादैः पिबति पादपः।।

5. श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां परोपकारैः न तु चन्दनेन।।

6. छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।

7. वनानि दहतो वह्नेः सखा भवति मारुतः।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम्।।

**IV - श्लोकस्याशयं लिखत -**

अमन्त्रमक्षरं नास्ति नास्ति सस्यमनौषधम्।
अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः।।

*आशयः -*

**V. यथोचितं योजयत -**

| | | |
|---|---|---|
| 1. हरिद्रा | ...................................... | त्वग्रोगविनाशकम् |
| 2. तुलसी | ...................................... | जठराग्निवर्धनम् |
| 3. आर्द्रकम् | ...................................... | तेजोवीर्यवर्धकम् |
| 4. निम्बः | ...................................... | वातपित्तज्वरादिहरः |
| 5. आमलकम् | ...................................... | विषनाशकम् |
| 6. मरिचम् | ...................................... | केशविवर्धकम् |
| 7. जपा | ...................................... | रक्तशुद्धिकरम् |
| 8. उदुम्बरः | ...................................... | कृमिनाशकम् |
| 9. द्रोणपुष्पी | ...................................... | कण्ठशुद्धिकरम् |
| 10. आरग्वधः | ...................................... | प्रमेहचर्मादिरोगहरम् |

**VI. कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत -**

1. का विषं नाशयति? ..............................................।
2. रक्तशुद्धिकरः वृक्षः कः? ..............................................।
3. हरिद्रया किं लक्ष्यते? ..............................................।
4. कृमिनाशकः कः? ..............................................।
5. आर्द्रकम् किम्? ..............................................।

कण्ठशुद्धिप्रदम् - तुलसी - प्रमेहचर्मादिहरम् - उदुम्बरः - निम्बः

**VII. भित्तिपत्रिका -**

1. 'जीवस्य जीवनम् सस्यम्'
2. 'वृक्षान् पालय रोगान् वारय'
3. 'सस्यसंरक्षणेन स्वास्थ्यसंरक्षणम्'
4. 'रोपय वृक्षान् अपनय रोगान्'
5. 'पनसं रोपय प्राणान् पालय'
6. 'सम्पत्काले वपेत् बीजं, लभेतापदि तद्फलम्'

7. ..........................................................

8. ..........................................................

**VIII. वृक्षः, वनस्पतिः, वीरुत्, ओषधिः इति क्रमेण सस्यानां पट्टिकां कुरूत -**

अश्वत्थः, द्राक्षा, इक्षुः, पूगः, आम्रः, कर्कटी, कदली कूश्माण्डः, गोधूमः, नालिकेरः, पनसः, गोस्तनी, व्रीहिः, उदुम्बरः, कारवेल्लः, शिग्रुः, यावनालः, आरग्वधः।

| वृक्षः | वनस्पतिः | वीरुत् | ओषधिः |
|---|---|---|---|
| | | | |

**IX. वृक्षस्य स्वभावं पठित्वा प्रदत्तेषु कस्मिन् विभागे अन्तर्भवतीति विविच्य लिखतु -**

(वृक्षः, वनस्पतिः, वीरुत्, ओषधिः)

1. वसन्तागमे अशोकेषु पुष्पाणि जायन्ते। ...............................।
2. नवमालिका चूतवृक्षमाश्रित्य वर्धते। ...............................।
3. भेण्डः फलान्ते नश्यति। ...............................।
4. कूश्माण्डः गृहोपरि प्रतानैः प्रसारिता भवति। ...............................।
5. गोधूमः धान्यानां पाकान्ते नाशमेति। ...............................।
6. आम्रेषु पुष्पाणि ततः फलानि च दृश्यन्ते। ...............................।

# एककम् २ पैतृकम् — कनकधारा ४

**I. पाठभागस्थान् श्लाकान् पठित्वा उत्तरं लिखत -**

1. सः भगवान् किमर्थं द्विजन्मनः गृहं विवेश ?

...................................................।

2. सा कृटुम्बिनी तं वटुवर्यं सादरं किम् अवोचत् ?

...................................................।

3. इदं जन्म निरर्थकं गतं - कारणं किम् ?

...................................................।

4. शङ्कराचार्यः किं निशम्य दयार्द्रधीः अभवत् ?

...................................................।

5. वटुवर्यः गृहिण्याः दारिद्र्यदशानिवृत्तये किं कृतवान् ?

...................................................।

6. स्तवेन तोषिता लक्ष्मीः किम् अकरोत् ?

...................................................।

7. सुमतिः सः शङ्करः किं कृत्वा शास्त्राणि अपठत् ?

...................................................।

**II. श्लोकानां गद्यक्रमम्/अन्वयं पूरयत -**

1. गुरोः कुले ........ सः ........... भैक्ष्यलिप्सया ....... सह जातु कस्यचित् ....... दिजन्मनः ......... विवेश हि।

2. तत्र गृहिणः ...... तं वटुवर्यं ......... अवोचत। ये भवादृशेषु ......... प्रतिपादयन्ति ते ......... हि ।

3. वयं विधिना ............... अकिञ्चनत्वतः ......... भैक्ष्यं ....... न शक्नुमः। इदं जन्म ......... गतं धिक्।

4. इति दिनम् ............. व्रतीन्दवे .......... प्रददौ। ज्ञाननिधिः अपि सः ........... निशम्य .......... अभवत्।

5. सः मुनिः ............. नवनीतकोमलैः .......... मधुरैः स्तवैः ................ उपतस्थिवान्।

6. अमुना वचनेन ......... तद्भवनं .............. कनकामलकैः ........... । विस्मयैः ........... हृदयं च।

7. आत्मवान् सः ............... ............. अमरस्पृहणीयसम्पदं विधाय .............. ............... सविधे ........... अशिक्षत।

**III. सन्धिः -**

1. धिक् + इदम् - धिगिदम्

वाक् + ईशः = ...................................

तत् + इदम् = ...................................

2. धीरयन्ती + असौ = धीरयन्त्यसौ

इति + उक्तम् = ...................................

इति + उवाच = ...................................

3. तत् + ज्ञानम् - तज्ज्ञानम्

किञ्चित् + ज्ञः - ...................................

4. कविः + अयम् = कविरयम्

गुरुः + अस्ति = ...................................

मुनिः + अवदत् = ...................................

**IV. विग्रहः -**

1. भैक्ष्यलिप्सा - भिक्षायाः भावः भैक्ष्यम्, तस्य लित्सा।

कारुण्यलिप्सा - ..............................................

सौन्दर्यलिप्सा - ..............................................

2. धनहीनः - धनेन हीनः।

मित्रहीनः - ..................................................

लज्जाहीना - लज्जया हीना।

विद्याहीना - ................................................

3. सादरम् - आदरेण सह वर्तते यस्मिन् कर्मणि तद्यथा तथा।

सामोदम् - ..................................................

सविनयम् - ..................................................

**V. शङ्कराचार्यस्य कृतीनां परिचायनम्।**

**कोष्ठके दत्तान् ग्रन्थान् निर्देशानुसारं वर्गीकुरुत -**

| |
|---|
| भगवद्गीताभाष्यम्, विवेकचूडामणिः, सौम्दर्यलहरी, मातृपञ्चकम्, कनकधारास्तवम्, उपनिषद्भाष्यम्, शिवानन्दलहरी, उपदेशसाहस्री, ब्रह्मसूत्रभाष्यम्, शतश्लोकी, आत्मबोधः, मनीषापञ्चकम्, प्रबोधसुधाकरम्, अच्युताष्टकम्, कालभैरवाष्टकम्, शिवानन्दलहरी, शिवपादादिस्तवम् |

| भाष्यग्रन्थाः | प्रकरणग्रन्थाः | स्तोत्रकाव्यानि |
|---|---|---|
| भगवद्गीताभाष्यम् | विवेकचूडामणिः | अच्युताष्टकम् |

**VI. सूचनाः स्वीकृत्य टिप्पणीलेखनम् -**

विद्यालये कस्यचित् छात्रस्य पिता रुग्णः जातः। निरालम्बः जातः ......... अध्यापकः जानाति..... विद्यालये चर्चा ......... सर्वेषां छात्राणां साहाय्यं ......... धनसमाहरणम् ..... तस्मै नूतन गृहनिर्माणाय प्रयत्नः।

**VII . जीवनचरितम् -**

जन्म कालटिदेशे — पितरौ शिवगुरुः आर्याम्बा — गुरुकुले वसन् — प्रतिगृहं — ब्राह्मणगृहं प्रविवेश — दारिद्र्यम् — स्तवेन स्तुतवान्।

एककम् २ पैतृकम्

# जयन्ति ते सुकृतिनः ५

**I. सन्धिः -**

1. एवेति = एव + इति

लतेति - ................ + .............

तथेति - ................ + .............

2. झटिति + एव = झटित्येव

इति + एते = ................

करोति + एव = .................

3. आसीत् + अयम् = आसीदयम्

तत् + इदम् - ................ + .............

जगत् + इयम् - ................ + .............

**II. समासः**

1. राष्ट्रपिता - राष्ट्रस्य पिता।

राष्ट्रपतिः - ............................................

कुलपतिः - ............................................

2. पुरुषोत्तमः - पुरुषाणाम् उत्तमः।

गुरुश्रेष्ठः - ............................................

गजवीरः - ............................................

3. दृश्यते अनेन इति - दर्शनम्।

नीयते अनेन इति - ............................................

क्रियते अनेन इति - ............................................

**III. रेखाङ्कितानि पदानि उत्तरत्वेन लब्धुमर्हान् प्रश्नान् लिखत।**

1. सः इदंप्रथमतया वेदानां कालनिर्णयं कृतवान्।

.........................................................................।

2. महात्मागान्धी **१८६९ अक्तूबर् द्वितीयदिनाङ्के** जनिमलभत।

.........................................................................।

3. गान्धिनः आत्मकथायाः नाम **सत्यशोधनं** भवति।

.........................................................................।

4. डा. एस्. राधाकृष्णः **तिरुत्तणी प्रदेशे** जनिमलभत।

..........................................................................।

5. डा. एस्. राधाकृष्णः ओक्स्फोर्ड् सर्वकलाशालां **पाठनाय** अगच्छत्।

..........................................................................।

**IV. सूक्तीः आचार्यान् च यथोचितं योजयतु -**

*उदा-* स्वराज्यं मे जन्माधिकारः - बालगंगाधरतिलकः

1. जय् हिन्द् - स्वामि विवेकानन्दः
2. वन्दे मातरम् - श्रीनारायणगुरुदेवः
3. जय् जवान्, जय किसान् - श्रीबुद्धः
4. उत्तिष्ठत जाग्रत - बङ्किं चन्द्रचाट्टर्जी
5. आशा दुःखस्य कारणम् - लाल् बहदूर्-शास्त्री
6. अहिंसा परमो धर्मः - सुभाष् चन्द्रबोस्
7. धर्मः कोऽप्यस्तु नः श्रीमन् नरस्योत्कर्षता भवेत् - व्यासः

| *सूक्तिः* | *आचार्यः* |
|---|---|
| | |

**V. ऋते उपयुज्य वाक्यं परिवर्तयत -**

*उदा -* भोजनाय पायसं नास्ति। अन्यत् सर्वम् अस्ति।

भोजनाय पायसात् ऋते अन्यत् सर्वम् अस्ति।

1. महानसे लवणं नास्ति। अन्यत् सर्वम् अस्ति।

..................................................................................

2. जलाशये कमलं नास्ति। अन्यत् सर्वम् अस्ति।

..................................................................................

3. कक्ष्यायां रमेशः न आगतः। अन्ये सर्वे आगताः।

..................................................................................

**VI. वार्तां पठित्वा श्रीनारायणगुरुदेवस्य जीवचरितरेखां लिखतु -**

इरिङ्ङालक्कुटा : केरलेषु सर्वत्र श्रीनारायणगुरुदेवस्य १६२ तम जयन्तीम् अधिकृत्य आघोषकार्यक्रमाः प्रचलिताः। केरलीयसांस्कृतिकसचिवः उद्घाटनं कृतवान्। श्रीनारायणः सामाजिकपरिष्कर्ता आसीत्। सः अस्पृश्यता, विद्यानिषेधः, जातिचिन्ता इत्यादीनां दुराचाराणां निवारणार्थं प्रयत्नं कृतवान्। गुरोः ***एका जातिः, एको धर्मः, एको देवः मनुष्यस्य*** इत्युक्तिः सदा स्मरणीया इति उद्घाटनभाषणे मन्त्री अवदत्।

नाम - ....................................

पितरौ - ....................................

जन्मदिनम् - ....................................

...................... - ....................................

...................... - ....................................

...................... - ....................................

...................... - ....................................

...................... - ....................................

**VII. जीवचरितरेखां पठित्वा महात्मनां जीवचरित्रं लिखत -**

1. नाम - **चट्टम्बिस्वामी**

जन्म - 1853 आगस्ट् तिरुवनन्तपुरम्

पितरौ - वासुदेवशर्मा, नङ्ङेमप्पिल्ला

विद्याभ्यासः - संस्कृतपठनं, तमिल् भाषापाण्डित्यम्, विविधेषु विषयेषु पण्डितः, विद्याधिराजः इति आहूतवान्।

चट्टम्बी इत्यस्य मोणिट्टर् इत्यर्थः।

हठयोगविद्यां प्रात्तवान्।

कर्ममण्डलम् - दारिद्र्यात् अनेकानि कर्माणि कृतवान् आसीत्। जनान् उद्बोधयति। अनेके ग्रन्थाः रचिताः

मरणम् - मेय् ५।

2. नाम - **अय्यन् काली**

जन्म - 1863 आगस्ट् 28

जन्म - वेङ्गानूर् तिरुवनन्तपुरम्

योगदानं - सामूहिकपरिष्कर्ता, दलितानां उन्नमनाय तुल्यनीत्यर्थं च प्रवर्तनम्।

मरणम् - 1941.

## एककम् २ पैतृकम्

# रागसुधारस.... ६

**I. पाठभागे दत्तांशं पठित्वा संक्षिप्तरूपेण पदसूर्यं पूरयत -**



**II. प्रदत्तं सम्भाषणांशं पठित्वा जीवनचरितरेखां पूरयतु -**

(स्वातितिरुनाल् महाराजं कश्चित् ब्राह्मणः मिलितवान्। तदा प्रवृत्तं सङ्कल्पितसम्भाषणम् अधः दत्तमस्ति)

ब्राह्मणः : (प्रविश्य) अये महात्मन्। नमो नमः।

स्वातिमहाराजः : अये भूसुरश्रेष्ठ! आगम्यताम्।

ब्राह्मणः : महाराजन्! भवान् 1813 तमे वर्षे जनिं लब्धवान् खलु। भवतः गर्भश्रीमान् इति नाम कथमभवत्।

स्वातिराजः : जन्मनः पूर्वमेव राज्याधिकारो मया स्वायत्तीकृतः। अतः तन्नाम अलभत।

ब्राह्मणः : भवान् वाग्गेयकारः खलु। भवतः इष्टतमः देवः कः?

स्वातिः : श्रीपद्मनाभः एव। तमधिकृत्य पद्मनाभशतकम्, भक्तिमञ्जरी, स्यानन्दूरपुरवर्णनप्रबन्धं च रचितवान्। उत्सवप्रबन्धं, कुचेलोपाख्यानं च अन्ये ग्रन्थाः।

ब्राह्मणः : सारसाक्ष परिपालय...., भावयामि रघुरामं....., इत्यदीनि कीर्त्तनानि भवता रचितानि खलु।

स्वातिराजः : आम्। मयैव कृतानि इमानि।

ब्राह्मणः : इरयिम्मन्तम्पी भवतः सभापण्डितः इति ज्ञायते।

स्वातिः : आम्। स मम सदसि वर्तमानः प्रसिद्धः वाग्गेयकारः।

ब्राह्मणः : महाराज! भवतः श्रमेण वञ्चिराजवंशस्य ख्यातिः वर्धितो भूयात्।

स्वातिराजः : शुभवचनेषु प्रीतोऽस्मि।

ब्राह्मणः : अनुगृहीतोऽस्मि।

*नाम -* ........................................................................./

*जन्म -* ..................................................................../

*नामान्तरम् -* ................................................................../

*कृतयः -* ................................................................................................/

*प्रसिद्धानि कीर्त्तनानि -* ............................................................................../

**III. उपरि लिखितां जीवनचरितरेखां उपयुज्य स्वातिमहाराजस्य जीवनचरितं लिखत।**

**IV. दत्तांशान् पठित्वा इष्टतमं रागं तथा गानं च कस्मिन् चलनचित्रे अन्तर्भवति इति लिखतु -**

| रागः | गानम् | चलनचित्रम् |
|---|---|---|
| 1. कल्याणी | ജാനകീ ജാനേ രാമാ ......... | ............................ |
| 2. काम्बोजी | സാമജ സഞ്ചാരിണി ........ | ............................ |
| 3. शङ्कराभरणम् | രഘുവംശപതേ............ | ............................ |
| 4. धन्यासी | എന്തിനു വേറൊരു സൂര്യോദയം | ............................ |
| 5. वसन्ता | സുന്ദരീ സുന്ദരീ ഒന്നൊരുങ്ങി... | ............................ |
| 6. श्रीरागं | ഏതോ വാർമുകിലിൻ ........ | ........................... |
| 7. आरभी | പുടമുറികല്യാണം ......... | ............................ |
| 8. मोहनम् | മഞ്ഞൾ പ്രസാദവും ........ | .......................... |
| 9. मायामालवं | പവനരച്ചെഴുതുന്നു ............ | ............................ |
| 10. रागमालिका | കാട്ടിലെ പാഴ്മുളംതിൽ.... | ............................. |

**V. समस्तपदं लिखत/एकपदं लिखत -**

1. सुहृदः भावः - सौहृदम्
2. दीनस्य भावः - ...............................
3. करुणायाः भावः - ...........................
4. क्रूरस्य भावः - ...............................

**VI. सन्धिः/विश्लेषणं/पदच्छेदं कुरुत**

1. चन्द्र इव - चन्द्रः + इव

   बाल आगच्छति = .......... +..........

   सूर्य इव = .......... +..........

2. तेनैव = तेन + एव

   अनेनैव = ......... + .........

   नैकः = ......... + .........

3. न्यवेदयच्च = न्यवेदयत् + च

   तच्च = .......... + ..........

   अवदच्च = .......... + ..........

**VII. खण्डिकां पाठित्वा प्रश्नानाम् उत्तराणि लिखत**

त्यागराज-मुत्तुस्वामिदीक्षित-श्यामशास्त्रिप्रमुखाः सङ्गीतज्ञाः कर्णाटकसङ्गीतलोके प्रसिद्धाः। एतेषु त्यागराजः प्रातस्स्मरणीयः। अयं प्रायः द्विसहस्राधिकानां कृतीनां कर्ता भवति। धर्मचिन्तापराः तथा सन्मार्गोपदेशकाः भवन्ति प्रायेण त्यागराजकृतयः। हंसध्वनिरागे विरचितं वातापि गणपतिम् इति प्रसिद्धं कीर्तनं मुत्तुस्वामिदीक्षितेन विरचितम्। 'कमलाम्बाम्', 'अभयाम्बाम्' इत्यादयः दीक्षितकृतिषु प्रसिद्धाः। श्यामशास्त्रिमहाभागः अपि तिरुवारूर् देशे अजायत। माञ्चि, चिन्तामणिः इत्यादीन् रागान् स एव प्रथमं प्रयुक्तवान्। गर्भश्रीमान् इति विख्यातः स्वातितिरुनाल् महाराजोऽपि कर्णाटकसङ्गीतविदुषां मध्ये अग्रगण्यः। सः श्रीपद्मनाभस्तुतिपराणि अनेकानि कीर्त्तनानि विरचितवान्।

1. कर्णाटकसंगीतलोके प्रातस्स्मरणीयः कः?

   .............................................................।

2. त्यागराजकृतीनां विशेषताः काः?

   .............................................................।

3. मुत्तुस्वामिदीक्षितस्य प्रसिद्धं कीर्तनं किम्?

   .............................................................।

4. माञ्ची चिन्तामणि इत्यादि रागान् कः प्रथमं प्रयुक्तवान्?

   .............................................................।

5. वातापि गणपतिं.... इति कीर्तनं कस्मिन् रागे निबद्धम्?

   .............................................................।

**VIII. कोष्ठकात् उचितं पदं स्वीकृत्य रिक्तस्थानं पुरयत -**

1. नद्यां ...................... जलम् अस्ति।

   (प्रभूतं, प्रकीर्णं, प्रथितं)

2. .................... पुरतः सुन्दरं उद्यानम् अस्ति।

   (गृहं, गृहस्य, गृहे)

3. मोहन्दास् करंचन्द् गान्धी ..................... महात्मागान्धी इति प्रसिद्धोऽभूत्।

   (पूर्वं, पश्चात्, प्रथितं)

4. कमलं ...................... सुन्दरं भवति।

   (नितरां, उच्चैः, पुरतः)

5. स्वातन्त्र्यलाभाय..................... नेतारः प्रयत्नं अकुर्वन्।

   (बहवः, बहूनि, बह्व्यः)

# एककम् ३ साहिती　काव्यमुक्तावलिः ७

**I. श्लोकानां गद्यक्रमं/अन्वयं लिखत -**

1. ........................ एवं वादिनि .......................... पितुः पार्श्वे .................... .................. गणयामास।
2. स मद्वचनात् त्वया ................। समक्षं .................. विशुद्धाम् अपि ....................... .....................यत् अहासीः। तत् श्रुतस्य ....................... सदृशम् किम्?
3. इमां तावकीं ................. अहं न वेद। ..................... विचित्ररूपाः खलु। .................... भवदापदम् .................... मम चेतः आधयः प्रसभं .................... ।
4. दयितजयमङ्गलैषिणी ................. लोचनजलानि न मुमोच। .................. गलद् .................. अवनिं यातं न विवेद।
5. स्वनाम .................... अकुर्वते। ते मयापि ................... न देयम्। हि मम अपि .................. पुंसा........................ कुलाबलाचारसहासनासहा।

**II पञ्च महाकाव्यानां तथा तेषां कर्तॄणां च नामानि यथोचितं योजयत।**

| महाकाव्यानि | | कर्तारः |
|---|---|---|
| १. रघुवंशम् | ............................... | भारविः |
| २. किरातार्जुनीयम् | ............................... | श्रीहर्षः |
| ३. शिशुपालवधम् | ............................... | कालिदासः |
| ४. कुमारसम्भवम् | ............................... | माघः |
| ५. नैषधीयचरितम् | ............................... | श्रीहीरः |
| | | कालिदासः |

**III. प्रधानकर्म विवेचयत -**

उदा- पिता पुत्रं वैद्यगृहं नयति।

प्रधानकर्म - पुत्रं। अप्रधानकर्म - वैद्यगृहं।

1. भृत्यः भारं ग्रामं वहति।　प्रधानकर्म - .................। अप्रधानकर्म - .................।
2. याचकः धनिकं धनं याचते।　प्रधानकर्म - .................। अप्रधानकर्म - .................।
3. माता तण्डुलान् अन्नं पचति।　प्रधानकर्म - .................। अप्रधानकर्म - .................।
4. शिष्यः गुरुं संशयं पृच्छति।　प्रधानकर्म - .................। अप्रधानकर्म - .................।
5. गोपालः गां पयः दोग्धि।　प्रधानकर्म - .................। अप्रधानकर्म - .................।

IV. श्लोके प्रयुक्तानाम् अक्षराणां गुरु - लघूनि विविच्य वृत्तं निर्णयतु। (केवलं निरन्तरमूल्यनिर्णयार्थम्)

*आदिमध्यावसानेषु य र ता यान्ति लाघवम्।*
*भ ज सा गौरवं यान्ति मनौ तु गुरुलाघवम्।।*

| | | | | | |
|---|---|---|---|---|---|
| आदिलघुः | U – – | य गणः | आदिगुरुः | – U U | भ गणः |
| मध्यलघुः | – U – | र गणः | मध्यगुरुः | U – U | ज गणः |
| अन्त्यलघुः | – – U | त गणः | अन्त्यगुरुः | U U – | स गणः |
| सर्वलघुः | U U U | न गणः | सर्वगुरुः | – – – | म गणः |

**इन्द्रवज्रा** - स्यादिन्द्रवज्रा यदि तौ जगौ गः।

प्रतिपादं तगणद्वयानन्तरं जगणः तदनन्तरं गुरुद्वयं च, तत्र इन्द्रवज्रा नाम वृत्तम्।

**उपेन्द्रवज्रा** - उपेन्द्रवज्रा ज त जास्ततो गौ।

प्रतिपादं जगणतगणानन्तरं जगणं ततः गुरुद्वयं च, तत्र उपेन्द्रवज्रा नाम वृत्तम्।

1. **उपजातिः** - अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इन्द्रवज्रोपन्द्रवज्रयोः सङ्करः उपजातिः।

| गणः | त | त | ज | गु गु |
|---|---|---|---|---|
| लघुः/गुरुः | – – U | – – U | U – U | – – |
| वर्णाः | वा च्य स्त्व | या म द्व | च ना त्स | रा जा |

| गणः | | | | |
|---|---|---|---|---|
| लघुः/गुरुः | | | | |
| वर्णाः | व ह्नौ वि | शु द्धा म | पि य त्स | म क्षम् |

| गणः | | | | |
|---|---|---|---|---|
| लघुः/गुरुः | | | | |
| वर्णाः | मां लो क | वा द श्र | व णा द | हा सीः |

| गणः | | | | |
|---|---|---|---|---|
| लघुः/गुरुः | | | | |
| वर्णाः | श्रु त स्य | किं त त्स | दृ शं कु | ल स्य |

2. **वशस्थम्**

| गणः | ज | त | ज | र |
|---|---|---|---|---|
| लघुः/गुरुः | U – U | – – U | U – U | – U – |
| वर्णाः | म या पि | दे यं प्र | ति वा चि | कं न ते |

| | | | | |
|---|---|---|---|---|
| गणः | | | | |
| लघुः/गुरुः | | | | |
| वर्णाः | स्व ना म | म त्क र्ण | सु धा म | कु र्व ते |

3. **उद्गता**

सजमादिमे सलघुके च, न स ज गु रु के ब्व थो द् ग ता
अङ्घ्रिगत भनजलागयुताः, सजसा जगौ चरणमेकतः पठेत्।

| | | | | |
|---|---|---|---|---|
| गणः | स | ज | स | |
| लघुः/गुरुः | U U – | U – U | U U – | U |
| वर्णाः | स ज मा | दि मे स | ल घु के | च |

| | | | | |
|---|---|---|---|---|
| गणः | न | स | ज | |
| लघुः/गुरुः | U U U | U U – | U – U | U |
| वर्णाः | न स ज | गु रु के | ष्व थो द्ग | ता |

| | | | | |
|---|---|---|---|---|
| गणः | भ | न | ज | |
| लघुः/गुरुः | – U U | U U U | U – U | U – |
| वर्णाः | अ ङ्घ्रि ग | त भ न | ज ला ग | यु ताः |

| | | | | | |
|---|---|---|---|---|---|
| गणः | स | ज | स | ज | |
| लघुः/गुरुः | U U – | U – U | U U – | U – U | – |
| वर्णाः | स ज सा | ज गौ च | र ण मे | क तः प | ठेत् |

प्रथमपादे सगणः जगणः, सगणः लघुश्च एवं दश वर्णाः।
द्वितीयपादे नगणः सगणः जगणः गुरुश्च एवं दश वर्णाः।
तृतीयपादे भगणः नगणः जगणः लघुः गुरुश्च एवम् एकादश वर्णाः।
चतुर्थपादे सगणः जगणः सगणः जगणः गुरुश्च एवं त्रयोदश वर्णाः।

| | | | | |
|---|---|---|---|---|
| गणः | | | | |
| लघुः/गुरुः | | | | |
| वर्णाः | न मु मो | च लो च | न ज ला नि | |

| गणः | | | | |
|---|---|---|---|---|
| लघुः/गुरुः | | | | |
| वर्णाः | द यि त | ज य म | ङ्ग लै षि | णी |

| गणः | | | | |
|---|---|---|---|---|
| लघुः/गुरुः | | | | |
| वर्णाः | या त म | व नि म | व स न्न | भु जा |

| गणः | | | | | |
|---|---|---|---|---|---|
| लघुः/गुरुः | | | | | |
| वर्णाः | न्न ग ल | द्वि वे द | व ल यं | वि ला सि | नी |

**V. कवीनां काव्यानां च नामानि यथोचितं योजयित्वा पट्टिकां कुरुत-**

कालिदासः, माघः, नैषधीयचरितम्, मूषिकवंशम्, भारविः, नवभारतम्, प्रो.पि.सि.देवस्या, मुतुकुलं श्रीधरः, किरातार्जुनीयम्, अतुलः, नैषधीयचरितम्, डा. के. एन्. एषुत्तच्छन्, श्रीहर्षः, क्रिस्तुभागवतम्, आङ्गलसाम्राज्यम्, राजराजवर्मा, केरलोदयम्, कुमारसंभवम्।

| ***कविः*** | ***काव्यम्*** |
|---|---|
| उदाः अतुलः | मूषिकवंशम् |

**VI. सन्धिं कुरुत/सन्धत्त -**

1. वाच्यः + त्वया = वाच्यस्त्वया

................ + .............. = इतस्ततः

................ + .............. = रामस्तदा

2. सः + राजा = स राजा

सः + एव = ..............................

बालः + उत्तिष्ठति = ..............................

**VII. समस्तपदं/एकपदं लिखत -**

पर्वतस्य अपत्यं स्त्री - पार्वती

गर्गस्य अपत्यं स्त्री - ..............................

हिमवतः अपत्यं स्त्री - ..............................

जनकस्य अपत्यं स्त्री - ..............................

महेश्वरस्य अपत्यं स्त्री - ..............................

**VIII. प्रयोगपरिचयः -**

**कर्त्तरि प्रयोगः -** कर्तरि प्राधान्ययुक्तः वाक्यप्रयोगः अयम्। कर्त्ता प्रथमाविभक्तौ, कर्म द्वितिया विभक्तौ, क्रिया कर्त्तारं अनुसृत्यैव भवति। *बालः पांठ पठति* इत्यत्र बालः कर्ता, पाठं कर्म, क्रिया कर्त्रनुसारिणी (प्रथमपुरुषैकवचनम्) च भवति।

**कर्मणि प्रयोगः -** कर्मणि प्राधान्ययुक्तः वाक्यप्रयोगः अयम्। कर्त्ता तृतीयाविभक्तौ, कर्म प्रथमाविभक्तौ, क्रिया कर्म अनुसृत्यैव भवति क्रिया आत्मनेपदी च।

*उदाः* - बालः पाठं पठति। कर्त्तरि प्रयोगः।

बालेन पाठः पठ्यते। कर्मणि प्रयोगः।

1. भक्तः ईश्वरं नमति।

.................................................................।

2. मार्जारः मूषकं खादति।

.................................................................।

3. रामः पाठं लिखति।

.................................................................।

**IX. प्रदत्तान् प्रयोगान् कर्तरि कर्मणि भेदेन विवेचयतु -**

१. बालाः विद्यालयं गच्छन्ति। २. गृहनाथः आपणं गच्छति।

३. अश्वः शीघ्रं धावति। ४. राधा नृत्तं करोति।

५. रामेण बालिः हन्यते। ६. केन इदं निर्मितम्।

७. राधिकया नृत्तमाचरितम्। ८. त्वया पाठः पठितव्यः।

| कर्तरि | कर्मणि |
|---|---|
| | |

**IX.** उन्नतिं प्राप्तवतीः नारीः अधिकृत्य पट्टिकां कुरुत।

| नाम | विभागः | उन्नतिमण्डलम् | वर्षः |
|---|---|---|---|
| १. श्रीमती.पि.वि सिन्धू | कायिकम् | ओलिम्पिक्स् स्पर्धायां द्वितीयस्थानं | 2016 |
| २. | | | |
| ३. | | | |
| ४. | | | |
| ५ | | | |
| ६. | | | |
| ७. | | | |
| ८. | | | |
| ९. | | | |
| १०. | | | |

## एककम् ३ साहिती

# विगतानुशयः ८

**I. प्रदत्तानां पदानाम् अर्थं मञ्जूषातः चित्वा लिखतु -**

समानवंशः, स्वपुत्रः, आश्रमे, शिशुः, वंशः, पुत्रराहित्यम्, शरीरम्, अग्निः, दृष्ट्वा, पुत्रः, रक्षामङ्गलम्

1. औरसः = .........................................।
2. अनपत्यता = .........................................।
3. डिम्भः = .........................................।
4. उटजे = .........................................।
5. व्यपदेशः = .........................................।
6. रक्षाकरण्डकं = .........................................।
7. निर्वर्ण्य = .........................................।
8. वत्सः = .........................................।
9. एकान्वयः = .........................................।
10. वह्निः = .........................................।
11. गात्रम् = .........................................।

**II. समानसन्धियुक्तानि पदानि पाठभागात् उद्धृत्य विश्लेषणं कुरुत -**

a. 1. बालोऽयम् = बालः + अयम्
2. .................................................
3. .................................................

b. 1. शकुन्तलेति = शकुन्तला + इति
2. .................................................
3. .................................................

c. 1. खल्वयम् = खलु + अयम्
2. .................................................
3. .................................................

d. 1. यस्यायम् = यस्य + अयम्
   2. ...............................................
   3. ...............................................

e. 1. इत्यस्य = इति + अस्य
   2. ...............................................
   3. ...............................................

**III. प्रदत्तं कथाभागं मातृभाषायां विवर्त्तयत -**

पुरुवंशराजः दुष्यन्तः मातलिना सह आकाशमार्गेण आगत्य प्रजापतेराश्रमं प्रविशति। तत्र सिंहशिशुना सह क्रीडन्तं चक्रवर्तिलक्षणोपेतं बालकं सर्वदमनं दृष्ट्वा सः विस्मितः भवति। अस्य शिशोः पुरुवंशबन्धुत्वं, अप्सरसः सम्बन्धेन जननं, च ज्ञात्वा सर्वाः घटनाः मामेव लक्षीकरोति इति शङ्कते। रक्षाकरण्डकग्रहणसमये अपि अनर्थकासम्भवात् अयं स्वपुत्र एवेति राजा आश्वसिति। तापसीभिः कथितं इमं वृत्तान्तं सर्वं ज्ञात्वा तत्रागता शकुन्तला स्वभर्तारं दुष्यन्तं दृष्ट्वा समाश्वसिति। अन्ते पश्चात्तापरहितः राजा तौ स्वराज्यं नयति।

**IV. उदाहरणानुसारं क्त्वान्त-ल्यबन्त-तुमुन्नन्तरूपाणि उपयुज्य पट्टिकां पूरयत -**

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| गत्वा | आगत्य | गन्तुम् |

**V. कथापात्राणां स्वभावमधिकृत्य टिप्पणीं लिखत -**

1. कालिदासस्य अभिज्ञानशाकुन्तले नायिका।

कण्वमहर्षेः पुत्री - सस्यलतादिषु सहजस्नेहः - दुष्यन्तं परिणीतवती - परित्यक्ता च - काश्यपाश्रमः - सर्वदमनो नाम पुत्रः - अन्ते दुष्यन्तेन स्वीकृता।

2. कालिदासस्य अभिज्ञानशाकुन्तले नायकः।

| |
|---|
| पुरुवंशे जातः। शकुन्तलां परिणीतः - शापेन परित्यक्तः च। धीरोदात्तः - भावप्रकटनं - प्रजापतेराश्रमे पुत्रदर्शनम्। शकुन्तलायाः राज्ञः च मिथः समागमः। |

3. शकुन्तलादुष्यन्तयोः पुत्रः -

| |
|---|
| धीरः समर्थः च - राजलक्षणसहितः - सिंहशाबकेन सह क्रीडा - पितरं दुष्यन्तं प्रति अभिमानः। |

VI. सूचनाः उपयुज्य शाकुन्तलम् अधिकृत्य खण्डिकां लिखत -

विश्वप्रसिद्धः संस्कृतमहाकविः कालिदासः। दुष्यन्तस्य शकुन्तलायाः च कथा। कश्यपस्य आश्रमे पुत्रदर्शनम्। धीरः समर्थः च सर्वदमनः। शकुन्तलया सह मेलनम्।

## एककम् ४ संस्कृतिः

## ईशोपदेशः ९

**I. पदम् अर्थं च यथोचितं योजयत -**

| अ | आ |
|---|---|
| 1. नाकः | इच्छन्तः |
| 2. दाम्भिकाः | रहस्यदर्शी |
| 3. लिप्सवः | वीथिषु |
| 4.रथ्यासु | स्वर्गः |
| 5. गुप्तदर्शी | कपटभक्ताः |

| | |
|---|---|
| | |

**II. उदाहरणानुसारं पदच्छेदं/विश्लेषणं कुरुत -**

1. चैव = च + एव

सहैव = ........................ + ............................

चैनं = .......................... + ..........................

2. पुनस्त्वम् = पुनः + त्वम्

दाम्भिकैस्त्वम् = ........................ + ...........................

बालस्तावत् = ......................... + ...........................

**III. उदाहरणानुसारं एकपदं लिखत -**

चतुर्णां पथां समाहारः - चतुष्पथम्

चतुर्णां युगानां समाहारः - ....................................................

त्रायाणां भुवनानां समाहारः - ....................................................

**IV. श्लोकानं गद्यक्रमं पूरयत -**

1. यूयम् ............................... परेषाम् .......................... जनतासमक्षं मा कार्ष्ट। एवं यदि ........................ उत्तुङ्गकृपाप्रसादः ...................... लभ्यः।
2. यदा भवान् तु .......................... ददाति तदा यथा ........................ ....................... स्तवनं च ............................ ........................... सभासु रथ्यासु च ......................... अग्रतः न कारयेत्।
3. त्वया दक्षिणहस्तदत्ता सा ..................... ते वामकरेण मा ...........................। एवं निभृतं कृतस्य .................. ..................... ....................... गुप्तदर्शी पिता दास्यति।
4. पुनः यदा त्वम् .................... .................... तदा त्वं ये .......................... समाजगेहे च ................. .................. भजन्ति हि ........................ ........................ मा भव।
5. पुनः यदा.................... तदा गृहं प्रविश्य ......................... ................................ ............................ एककः स्वतातं प्रति ....................... याचनां कुरु.................... पिता ................................ दास्यति।

**V. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत। उत्तराणाम् आशयं क्रोडीकृत्य खण्डिकां लिखत -**

1. धर्माचरणं किमर्थम्?

   ..........................................................................

2. दानं कथं करणीयम्?

   ..........................................................................

3. कीदृशाः जनाः कपटभक्ताः भवन्ति?

   ..........................................................................

4. दानस्य शैली का?

   ..........................................................................

5. ईश्वरसेवा कुत्र करणीया?

   ..........................................................................

6. कीदृशैः जनैः सदृशो मा भवतु?

   ..........................................................................

7. कीदृशं ईश्वरं भजेत?

   ..........................................................................

**VI. गुरोः शिष्यस्य च मिथः भाषणं पठित्वा प्रभाषणं लिखत -**

शिष्यः - नमस्ते। धर्मशब्दस्य कः अर्थः?

गुरुः - नमस्ते। धर्मशब्दस्य पुण्यं, श्रेयः, सुकृतं, सत्सङ्गः इत्यादयः अर्थाः?

शिष्यः - धर्मम् अधिकृत्य सूक्तयः सन्ति वा?

गुरुः - धर्मो रक्षति रक्षितः, धर्मोऽस्मत् कुलदैवतम् इत्याद्याः सूक्तयः सन्ति।

शिष्यः - धर्माचरणस्य प्राधान्यं किम्?

गुरुः - सत्यं वद, धर्मं चर इत्याद्युपदेशाः धर्माचरणस्य प्राधान्यं निर्वक्ति।

शिष्यः - धर्माचरणं कथं भवितव्यम्?

गुरुः - धर्माचरणं स्वात्मनिर्वृतये एव भवितव्यम्।

शिष्यः - अधार्मिकस्य स्वभावः कः?

गुरुः - आजीवम् अधर्ममेव रहसि कृत्वा जनानां पुरतः धर्मानुसारं जीवनं करोति इति उद्घोषः दुर्जनानं स्वभावः।

शिष्यः - धन्यवादः।

गुरुः - धन्यवादः।

**VII. केरलीयसंस्कृतकवीनां काव्यानां च पट्टिकां कुरुत -**

मूषिकवंशं, युधिष्ठिरविजयम्, धातुकाव्यम्, नारायणीयम्, आङ्गलसाम्राज्यम्, विशाखविजयम्, केरलोदयः, क्रिस्तुभागवतम्, शिवलीलार्णवम्, नवभारतम्। मेल्पत्तूरु, अतुलकविः, पुरुवनं वासुदेवः, ए.आर्. राजराजवर्म, केरलावर्मा वलियकोयितम्पुरान्, डा.के. एन्. एषुत्तच्छन्, प्रो.पी.सी देवस्या, दामोदरचाक्यार्, मुतुकुलं श्रीधरः।

| **काव्यम्** | | **कविः** |
|---|---|---|
| मुषिकवंशम् | | अतुलकविः |
| ........................ | - | ........................ |
| नारायणीयम् | - | ........................ |
| ........................ | - | ........................ |
| ........................ | - | ........................ |
| ........................ | - | राजराजवर्मा |
| ........................ | - | ........................ |

**VIII. उदाहरणानुसारम् उपदेशरूपाणि वाक्यानि लिखत। भित्तिपत्रिकां रचयत -**

*उदा* - सत्यं वद, धर्मं चर

लोकाः समस्ताः सुखिनो भवन्तु।

....................................................

....................................................

**IX.** *यस्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।*

*दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।।* **- इति श्रीमद्भगवद्गीताश्लोकस्याशयः पाठभागस्थस्य कस्य श्लोकस्य आशयेन युज्यते इति लिखतु -**

---

एककम् ४ संस्कृतिः

# किमसौ न भयङ्करः

१०

**I. प्रदत्तानां पदानां समानार्थकपदानि पाठभागात् चित्वा लिखतु -**

1. गुहा = .........................
2. जम्बूकः = .........................
3. सामर्थ्य = .........................
4. अनेकवारं = .........................
5. सदा = .........................
6. भार्या = .........................
7. पतिः = .........................
8. मौनम् = .........................
9. शब्दः = .........................
10. रसना = .........................

**II. विश्लेषणं कुरुत -**

अन्यानजान् = अन्यान् + अजान्

बालानपि = .................... + .....................

कवीनितरान् = .................... + ...................

**III. समस्तपदं/एकपदं लिखत -**

शृगालस्य भार्या - शृगालभार्या

अजस्य मांसः - ...................................................

अजानां समूहः - ..................................................

**IV. विग्रहवाक्यं लिखत -**

1. प्रतिदिनम् - दिने दिने
2. प्रतिक्षणम् - .....................................................
3. प्रतिवारम् - .....................................................

**V. सम्भाषणांशान् पूरयत -**

शृगालभार्या - हे अजे, मया साकं आगच्छतु।

अजा - न, न। तव ................. अस्मान् सर्वान् मारितवान्।

शृगालभार्या - मम भर्ता .....................। किमर्थं भीतिः? आगच्छतु।

अजा - साधु। मया साकं पञ्चशतं .................... आगमिष्यन्ति।

शृगालभाया - अस्तु। भोजनव्यवस्थां सज्जीकृत्य आगमिष्यामि।

पुनः ..............। अहं गच्छामि।

**VI. कथास्तम्भान् क्रमीकरोतु -**

1. एकदा शृगालः एकाम् अजां गृहीत्वा पत्न्या साकम् अभक्षयत्।
2. एका अजा बुद्धिमती आसीत्।
3. एकस्मिन् गह्वरे शतशः वनाजाः स्वैरम् अवसन्।
4. क्रमेण अजानां संख्या न्यूना जाता।
5. सा तया सह गन्तुं निश्चिकाय।
6. भर्त्तुः उपायः विफलः परिणतः।
7. नो चेत् ते त्वां तव पतिं च खादिष्यन्ति।
8. शिष्टः अजसमूहश्च नित्यम् अनापदं पदम् अवाप।
9. उपायं श्रुत्वा शृगालभार्या अजायाः समीपम् आगच्छत्।
10. तव सान्निध्येन मम पत्युः प्राणाः प्रत्यागताः।

**VII. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

जातककथाः बौद्धधर्मेण सम्बन्द्धाः। गौतमबुद्धस्य जन्मान्तरानुभवाः विद्यन्ते तासु। ताः मनुजपक्षिमृगादीनां कथाद्वारा प्रपञ्चे जीवनस्य नश्वरतां तथा मूल्ययुक्तस्य सदाचारजीवनस्य प्रसक्तिं च आविष्कुर्वन्ति। अस्यां कथायां काचन समर्था अजा स्वबुद्धिवैभवेन आपद्भ्यः रक्षां प्राप्नोति अन्यानजान् संरक्षति च । अत्र एषा अजा गौतमबुद्धस्य पूर्वजन्म एव भवति इति विश्वासः।

1. जातककथाः कस्य पुर्वजन्मकथाः भवन्ति?

.......................................................................................

2. अजा काभ्यश्चित् आपद्भ्यः रक्षां प्राप्नोति?

.......................................................................................

3. मनुजपक्षिमृगादीनां कथाद्वारा कस्य नश्वरताम् आविष्कुर्वन्ति?

.......................................................................................

4. जातककथाः केन सम्बन्द्धाः?

.......................................................................................

5. जातककथासु कस्य अनुभवाः विद्यन्ते?

.......................................................................................

**VIII. प्रदत्तं वाक्यं कस्येति विवेचयत -**

1. भवत्याः भर्ता कुटिलचित्तः अस्ति, अतः न आगमिष्यामि।
(अजायाः, श्रृगालपत्न्याः, शुनकस्य) ..........................................

2. प्रिये, तव शक्तिः अपारा एव।
(श्रृगालस्य, अजस्य, पत्न्याः) ..........................................

3. शुभे, भोजव्यवस्थां सज्जीकृत्य आगमिष्यामि।
(भार्यायाः, श्रृगालपत्न्याः, अजायाः) ..........................................

**IX. खण्डिकां मातृभाषायां विवर्तयत -**

जातककथाः बौद्धधर्मेण सम्बन्द्धाः । गौतमबुद्धस्य जन्मान्तरानुभवाः विद्यन्ते तासु। मनुजपक्षिमृगादीनां कथाद्वारा प्रपञ्चे जीवनस्य नश्वरतां तथा मूल्ययुक्तस्य सदाचारजीवनस्य प्रसक्तिं च आविष्कुर्वन्ति च। अत्र एषा अजा गौतमबुद्धस्य पूर्वजन्म एव भवति इति विश्वासः।

**X. प्रदत्ताः सूचनाः उपयुज्य शृगालेन प्रयुक्तम् उपायं लिखतु -**

हिमालयस्य सानुप्रदेशः ......... अजाः............. शृगालःभक्षयति ............ संख्या न्यूना ...... बुद्धिमती अजा ........ तस्या वधः करणीयः .......... शृगालस्य उपायः ............ शृगालपत्नी वदति ......... शृगालो मृतः ......... अजा आगच्छति ....... पदनिस्स्वनं शृणोति ........ शृगालं पश्यति- भीता पलायिता च। शृगालस्य उपायः विफलः।

**सूचनाः उपयुज्य शृगालपत्न्या प्रयुक्तः उपायः विपुलीकुरुत -**

शृगालपत्नी ....... उपायं ....... अजासमीपं ............ पत्युः प्राणालाभः .......... तेन सह भाषणं ........ पुनःसन्दर्शनाय आमन्त्रणं ........... अजा ............ प्रत्युत्तरं वदति ........ भीता .......... शृगालपत्नी धावति.......... उपायः विफलः।

**प्रदत्तसूचनानुसारम् अजायाः प्रयुक्तः उपायः विपुलीकुरुत -**

शृगालपत्नी ………. अजायाः समीपं गच्छति ………. पुनः सन्दर्शनाय प्रार्थयते……… बुद्धिमती अजा ……. उपायः ……….. द्विसहस्रं शुनकैः साकं …….. भोजनं ………. नो चेत् ……. शृगालकुटुम्बस्य वधः……. भीता शृगालपत्नी ………. प्रतिगच्छति बुद्धिः एव शक्तिः।

एककम् ४ संस्कृतिः

# प्राप्य वरान् निबोधत

११

**I. मञ्जूषातः समानार्थयुक्तानि पदानि चित्वा योजयित्वा च पदानि समानपदानि च लिखतु -**

धीराः, मूढबुद्धयः ; चित्तेन, निशितः, वरान्, अविद्या, मनसा, तीक्ष्णः, बुद्धिमन्तः, श्रेष्ठान्, पुरुषः, कुसुमम्।

| पदानि | समानपदानि |
|---|---|
| | |

**II. उदाहरणानुसारं पदच्छेदं कुरुत -**

भवत्ययुक्तेन = भवति + अयुक्तेन

इत्यपि = ................ + ................

इत्यवदत् = ................ + ................

**III. समस्तपदं लिखत/एकपदं लिखत -**

दृष्टाः च अमी अश्वाः च - दृष्टाश्वाः

अलसाः च अमी बालाः च - ..............................

धीराः च अमी पुरुषाः च - ..............................

**IV. श्लोकानां गद्यक्रमं पुरयत -**

1. अविद्यायाम् अन्तरे .................................... स्वयं धीराः ............................ मूढाः यथा ...................... ..................... नीयमानाः अन्धाः ........................ परियन्ति।

2. यः तु सदा ...................... मनसा ..................... भवति तस्य ......................... सारथेः ............................ ............................ अवश्यानि।

3. उत्तिष्ठत ................. वरान् .............. निबोधत। ................ धारा .....................
दुरत्यया तत् पथः दुर्गं .................... वदन्ति।

**V. समानाशययुक्तानि सुभाषितानि सञ्चित्य लिखत -**

1. नृपमपेक्ष्य विद्वान् सर्वत्र पूज्यते।

2. विद्याहीनाः निर्गन्धाः किंशुका इव।

3. विद्या पुस्तकस्था चेत् न उपकरोति।

**VI. प्रश्नानाम् उत्तरं लिखत -**

1. मूढाः किं चिन्तयन्ति?
...............................................
2. मूढाः कस्मिन् मार्गे चरन्ति?
...............................................
3. आत्मज्ञानिनाम् इन्द्रियाणि अनधीनानि भवन्ति। कथम्?
...............................................
4. विज्ञानस्य मार्गः कीदृशः?
...............................................
5. श्लोके विद्यमानः उपदेशः कः?
.........................................

**VII. सूचनाः विपुलीकृत्य खाण्डिकां लिखत -**

*सूचनाः -*

उपनिषदि ज्ञानमार्गोपदेशः (आमुखम्)

अज्ञाः दृष्टिरहितेन नीयमानाः दृष्टिरहिता इव ......

अज्ञानिनामिन्द्रियाणि अनधीनानि ......

विज्ञानस्य मार्गं गन्तुम् अशक्यः .......

**VIII. ध्येयवाक्यानि - संस्था - उपनिषत् च योजयत -**

| *ध्येयवाक्यम्* | *उपनिषत्* | *संस्था* |
|---|---|---|
| 1. विद्यया अमृतमश्नुते | बृहदारण्यकम् | भारतसर्वकारः |
| 2. सत्यमेव जयते | केनोपनिषत् | केन्द्रियमाध्यमिकशिक्षा बोर्ड् |
| 3. असतो मा सद्गमय | कठोपनिषत् | बनारस् हिन्दुविश्वविद्यालयः |

| *ध्येयवाक्यम्* | *उपनिषत्* | *संस्था* |
|---|---|---|
| | | |

**IX. अधो दत्तेषु वेदवेदाङ्गोपनिषदः विविच्य पट्टिकां रचयत -**

ऋक्, निरुक्तम्, कठम्, छन्दः, साम, माण्डूक्यम्, यजुः,
शिक्षा, अथर्वः, तैत्तिरीयम्, ईशम्, व्याकरणम्

| वेदाः | वेदाङ्गानि | उपनिषदः |
|---|---|---|
| | | |